**Series : 1GEFH** | **SET~4**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं। | (I) | Please check that this question paper contains **15** printed pages. |
| (II) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें। | (II) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं। | (III) | Please check that this question paper contains **18** questions. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।** | (IV) | **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे। # | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम्
# SANSKRIT

*अवधि : होरात्रयम्*
*निर्धारित समय : **3** घण्टे*
*Time allowed : **3** hours*

*पूर्णाङ्काः : **80***
*अधिकतम अंक : **80***
*Maximum Marks : **80***

***General Instructions :***

*This question paper is divided into **4** (Four) sections.*

*It has total **18** questions.*

*  **Section A** – 1 Question no. 1 to 1*
*  **Section B** – 3 Questions no. 2 to 4*
*  **Section C** – 7 Questions no. 5 to 11*
*  **Section D** – 7 Questions no. 12 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य-निर्देशा:***

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति।*

*अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्ना: सन्ति।*

*  **खण्ड: 'क'** – 1 – प्रश्नसंख्या 1*
*  **खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4*
*  **खण्ड: 'ग'** – 7 – प्रश्नसंख्या 5 – 11*
*  **खण्ड: 'घ'** – 7 – प्रश्नसंख्या 12 – 18*

*विशिष्टनिर्देशानुसारं प्रश्ना: समाधेया:।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।*

**खण्ड: 'क'** ***10 अङ्का:***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *10*

परोपकार: अर्थात् परेषाम् उपकार: अस्ति। परोपकारस्य प्रवृत्त्या एव मनुष्य: पशुभ्य: पृथक् भवति। आहारादिप्रवृत्तिषु पशव: मानवै: समं भवन्ति, परं मानव: स्वविवेकेन ज्ञानेन च आत्मन: उन्नतिं करोति। अपि च, न केवलं मानवा: अपितु अस्माकं प्रकृति: अपि परेभ्य: एव अस्ति। यथा वृक्षा: स्वफलानि न खादन्ति, ते परेषां कृते एव फलानि छायां च यच्छन्ति। नद्य: परोपकाराय एव वहन्ति। गाव: अन्येभ्य: एव दुग्धं यच्छन्ति। अस्माकं पुण्यभूमौ अनेके महापुरुषा: अभवन् ये स्वप्राणान् परित्यज्य देशस्य समाजस्य च रक्षाम् अकुर्वन्। राजा शिवि: शरणागतस्य कपोतस्य रक्षायै स्वशरीरस्य मांसं कर्तयित्वा श्येनाय दत्तवान्। ऋषि: दधीचि: अपि वृत्रासुरवधाय स्वास्थीनि सहर्षम् अयच्छत्। अद्यापि लोके अनेके समाजसुधारका: सन्ति ये स्वार्थं परित्यज्य लोककल्याणं कुर्वन्ति। अत: सत्यमेव कथितम् —

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकार: पुण्याय पापाय परपीडनम्॥

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) का: परोपकाराय एव वहन्ति ?

(ii) केषु पशव: मानवै: समं भवन्ति ?

(iii) क: वृत्रासुरवधाय स्वास्थीनि सहर्षम् अयच्छत् ?

(आ) पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) मनुष्य: पशुभ्य: कथं पृथक् भवति ?

(ii) राजा शिवि: शरणागतस्य कपोतस्य रक्षायै किं कृतवान् ?

(iii) मानव: केन आत्मन: उन्नतिं करोति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1*

(ई) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'गाव: अन्येभ्य: एव दुग्धं यच्छन्ति' अत्र किं कर्तृपदम् ?

(A) गाव: (B) अन्येभ्य:

(C) यच्छन्ति (D) एव

(ii) 'दधीचि:' इति विशेष्यपदस्य विशेषणपदं किम् ?

(A) ऋषि: (B) गाव:

(C) मानव: (D) पशव:

(iii) 'तरव:' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(A) नद्य: (B) वृक्षा:

(C) गाव: (D) फलानि

(iv) 'ते परेषां कृते एव फलानि छायां च यच्छन्ति' अस्मिन् वाक्ये 'ते' इति पदं कस्मै प्रयुक्तम् ?

(A) जनेभ्य: (B) सर्वेभ्य:

(C) नदीभ्य: (D) वृक्षेभ्य:

**खण्डः 'ख'** **15 अङ्काः**

**रचनात्मकं कार्यम्**

**2.** भवतः नाम ध्रुवः । भवान् उत्तरप्रदेशस्य एकस्मिन् छात्रावासे वसति । भवतः माता अरुणा भवन्तं अनुशासनस्य महत्वम् ज्ञापयितुं पत्रं लिखति । ध्रुवं प्रति लिखितं पत्र पूरयित्वा पुनः लिखत । $10\times\frac{1}{2}=5$

12, गगनविहारः,

दिल्लीतः

प्रिय ध्रुव !

(i) ______________ ।

अत्र (ii) ____________ तत्रास्तु । (iii) ____________ मन्ये तव अध्ययनं सम्यक् चलति यतः त्वम् अनुशासितः छात्रः असि । पुत्र ! जीवनस्य प्रत्येकं क्षेत्रे अनुशासनस्य (iv) ___________ आवश्यकता भवति । अनुशासनं हि नाम कर्तव्यपालनम् । सर्वेषां कृते (v) ___________ आवश्यकम् । मानवजीवने कर्त्तव्य-अकर्तव्यबोधः अनुशासनेन एव भवति । परं च अद्यत्वे छात्रेषु अनुशासनस्य भावः न दृश्यते । ते (vi) ___________ अनुशासनं न पालयन्ति । गुरून् मातापितॄन् च (vii) _________ । त्वं कदापि एवं न कुरु यतः अनुशासनं विना जीवने (viii) ____________ न प्राप्यते । त्वं स्व-स्वास्थ्यं प्रति अपि (ix) _________ भव । समयेन भोजनं कुरु, विश्रामम् अपि आवश्यकम् । शेषं सर्वं कुशलम् ।


भवतः माता

(x) ____________

**मञ्जूषा**

| |
|---|
| महती, सावधानः, तिरस्कुर्वन्ति, अनुशासनम्, अहम्, चिरंजीव, अरुणा, साफल्यम्, विद्यालयस्य, कुशलम् । |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

उपवनम्, महिला, वृक्षाः, सूर्योदयः, स्वच्छम्, कृषकाः, हरीतिमा, बालकाः, खगाः, उदेति, व्यायामः, पित्रा, बालिका, पुष्पाणि, धावति, वातावरणम्, आकाशे, सन्ति।

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –

**'योगस्य लाभाः'**

**मञ्जूषा**

शरीरम्, स्वस्थः, जनाः, आनन्दम्, प्रातःकाले, मानसिकम्, स्वास्थ्यम्, स्फूर्तिः, भवति, अनुभवन्ति, सर्वे, छात्राः, समयानुसारम्, यथाशक्ति।

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्) *5×1=5*

(i) हम सब संस्कृत पढ़ते हैं।
We all study Sanskrit.

(ii) हमें अपने स्वास्थ्य की रक्षा करनी चाहिए।
We should take care of our health.

(iii) सैनिकों ने देशरक्षा के लिए युद्ध किया।
The soldiers fought for the defence of their country.

(iv) वे सब मैदान में खेलने जाएँगे।
They will go to play in the field.

(v) चारों वेद ईश्वर की वाणी हैं।
The four Vedas are words of God.

(vi) बच्चों ! तुम वहाँ जाओ।
Children ! You go there.

(vii) सबको सदैव प्रसन्न रहना चाहिए।
All should be happy always.

**खण्डः 'ग'** ***25 अङ्काः***

**अनुप्रयुक्तव्याकरणम्**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) नास्ति <u>योजकः + तत्र</u> दुर्लभः।

(ii) जन्तून् पार्थिवरूपेण स <u>कृतान्तो</u> न संशयः।

(iii) सर्वथा <u>सम्यक् + उक्तं</u> सिंहमहोदयेन।

(iv) कृषकः क्षेत्रकर्षणं <u>कुर्वन्नासीत्</u>।

(v) <u>एतयोर्जननी</u> तेनावमानिता निर्वासिता।

**6.** रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम् ) *4×1=4*

(i) नास्ति किञ्चित् निरर्थकम् ।

(A) अर्थस्य योग्यम्

(B) अर्थस्य प्रति

(C) अर्थस्य सहितम्

(D) अर्थस्य अभाव:

(ii) नैव जनग्रसनम् ।

(A) जनेषु ग्रसनम्

(B) जनान् ग्रसनम्

(C) जनानां ग्रसनम्

(D) जनेभ्य: ग्रसनम्

(iii) सर्वेषु अपत्येषु जननी तुल्यवत्सला ।

(A) तुल्यं वत्सलं यस्या: सा

(B) तुल्यं वत्सलं यस्य स:

(C) तुल्यं वत्सलम्

(D) तुल्यं वत्सलं सा

(iv) तयो: एक: शरीरेण दुर्बल: आसीत् ।

(A) शरीरादुर्बल:

(B) शरीरदुर्बल:

(C) शरीर्दुर्बल:

(D) शरीरेदुर्बल:

(v) क्षत्रियकुलपितामहयो: सूर्ये च चन्द्रे च को वा भवतोर्वंशस्य कर्ता ।

(A) सूर्यचन्द्र:

(B) सूर्यचन्द्रयो:

(C) सूर्यचन्द्राभ्याम्

(D) सूर्यचन्द्रौ

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) कुसुमावलिः समीरचालिता मे वरणीया।

(A) वरणीय + आ

(B) वरणीया + आ

(C) वरणीय + टाप्

(D) वरणीय + इन्

(ii) मम पिता मह्यम् एकां संस्कृतस्य मास + ठक् पत्रिकाम् आनीतवान्।

(A) मासिकम्

(B) मासिका

(C) मासिकीम्

(D) मासिकः

(iii) आकारस्य लघु + त्व कार्यबाधकः न भवति।

(A) लघुत्वम्

(B) लघुत्व

(C) लघुता

(D) लघुत्वा

(iv) जनैः गङ्गायाः शुद्धता करणीया।

(A) शुद्ध + टाप्

(B) शुद्ध + तल्

(C) शुद्ध + त्व

(D) शुद्ध + क्त्वा

(v) ताः कन्याः गुणवत्यः सन्ति।

(A) गुण + मतुप्

(B) गुण + टाप्

(C) गुण + त्व

(D) गुण + क्तवतु

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) त्वया चित्राणि __________ ।

(A) दृश्यन्ते

(B) दृश्ये

(C) दृश्येते

(D) दृश्यते

(ii) _________ ध्यानेन पठनं करोमि ।

(A) मह्यम्

(B) माम्

(C) अस्माभिः

(D) अहम्

(iii) साधुना _________ क्रियते ।

(A) पूजायाम्

(B) पूजा

(C) पूजायाः

(D) पूजाम्

(iv) किं त्वया ग्रामः ____________ ?

(A) गम्यन्ते

(B) गम्येते

(C) गच्छामि

(D) गम्यते

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) मम मित्रं प्रातः (6:45) धावनं करोति।

(ii) तदा सः (8:00) विद्यालयं गच्छति।

(iii) (1:30) विद्यालयात् गृहम् आगच्छति।

(iv) सायंकाले (4:15) क्रिकेटक्रीडां क्रीडति।

(v) तदन्तरं सः (7:00) पठनं करोति।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) तव भोजनावकाशः __________ भविष्यति ?

(ii) __________ मम जन्मदिवसे मम गृहे यज्ञम् अभवत्।

(iii) यदि सर्वे प्रयासं न करिष्यन्ति __________ पर्यावरणं शुद्धं न भविष्यति।

(iv) शिशुः __________ चलित्वा मातुः समीपम् आगच्छत्।

**मञ्जूषा**

| |
|---|
| ह्यः, शनैः, तर्हि, कदा। |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) सा शोभना कन्या <u>सन्ति</u>।

(A) आसम्

(B) स्तः

(C) अस्तु

(D) अस्ति

(ii) <u>नीलः</u> गगनं शोभते।

(A) नीलाम्

(B) नीलम्

(C) नीला

(D) नीलस्य

(iii) <u>शाखेषु</u> खगा: सन्ति ।

(A) शाखायाम्

(B) शाखे

(C) शाखा

(D) शाखया

(iv) पिता <u>पुत्राय</u> स्निह्यति ।

(A) पुत्रस्य

(B) पुत्रेण

(C) पुत्रे

(D) पुत्रौ

## खण्ड: 'घ'

### पठितावबोधनम् *30 अङ्का:*

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह: नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद – ''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते ।''

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) राजसिंह: कुत्र वसति स्म ?

(ख) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता ?

(ग) सा कुत्र एकं व्याघ्रं ददर्श ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद ?

(ख) एकदा का पितुः गृहं प्रति चलिता ?

(ग) बुद्धिमती किमर्थं पितुर्गृहं प्रति चलिता ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) 'जगाद' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'व्याघ्रम्' इति पदस्य विशेषणपदं किम् ?

(ग) अनुच्छेदे 'अपश्यत्' इत्यस्य पदस्य कः पर्यायः प्रयुक्तः ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5

रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2 \times \frac{1}{2} = 1$

(क) अस्मिन् श्लोके कविः कं सम्बोधयति ?

(ख) कीदृशं वचः न ब्रूहि ?

(ग) अम्भोदाः कुत्र सन्ति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) बहवः के सन्ति ?

(ख) सर्वस्य पुरतः किं न वक्तव्यम् ?

(ग) के वृष्टिभिः वसुधां आर्द्रयन्ति ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) 'केचिद् वृथा गर्जन्ति ।' अत्र 'केचिद्' पदं केभ्यः प्रयुक्तम् ?

(ख) 'बहवः अम्भोदाः' अनयोः पदयोः विशेषणपदं किम् ?

(ग) श्लोके 'समक्षम्' इत्यस्य पदस्य कः पर्यायः प्रयुक्तोऽस्ति ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

*सुरभिः* – भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?'' इति प्रत्यवोचत्।

''भद्रे ! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम् ?'' इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत् – ''बहून्यपत्यानि मे सन्तीति सत्यम् तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव'' इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

स च तामेवमसान्त्वयत् – ''गच्छ वत्से ! सर्वं भद्रं जायेत।''

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कस्य दैन्यं दृष्ट्वा सा रोदिति ?

(ख) सर्वेष्वपत्येषु का तुल्यवत्सला ?

(ग) सः केन भारमुद्वहति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) कस्मिन् मातुः अभ्यधिका कृपा सहजैव ?

(ख) सुरभिवचनं श्रुत्वा किम् अभवत् ?

(ग) आखण्डलः किं कथयित्वा सुरभिम् असान्त्वयत् ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'सुते' इति पदस्य विशेषणपदं किम् ?

(ख) 'पीडयति' इति क्रियापदस्य कर्तृपदं किम् ?

(ग) 'आकर्ण्य' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**15.** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) जनकेन शैशवे <u>सुताय</u> विद्याधनं दीयते।

(ii) <u>प्रकृत्या:</u> सन्निधौ वास्तविकं सुखं विद्यते।

(iii) <u>भ्रातरौ</u> आवाम् सोदर्यौ स्व:।

(iv) सिंह: <u>वानराभ्यां</u> स्वरक्षायाम् असमर्थ: एवासीत्।

(v) तत्र राजसिंह: नाम <u>राजपुत्र:</u> वसति स्म।

**16.** मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत – *4×1=4*

दुष्कराण्यपि कर्माणि मतिवैभवशालिन:।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते॥

**अन्वय:** –

मतिवैभवशालिन: (जना:) (i) _________ युक्तिं (च) (ii) _________ दुष्कराणि (iii) ________ कर्माणि (iv) ________ एव प्रकुर्वते।

**मञ्जूषा**

| |
|---|
| लीलया, नीतिम्, अपि, समालम्ब्य। |

**अथवा**

अधोलिखितश्लोकस्य भावार्थं रिक्तस्थानानि मञ्जूषाया: साहाय्येन पूरयित्वा पुन: लिखत –

काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो:।
वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥

**भावार्थ:** –

अस्य भावोऽस्ति यत् काकस्य वर्ण: (i) _________ वर्तते (ii) _________अपि वर्ण: कृष्ण: एव अस्ति। अत: तयो: (iii) ___________ मध्ये क: भेद: अस्ति ? अर्थात् वर्णदृष्ट्या तयो: कश्चिद् भेदो न दृश्यते। परन्तु यदा (iv) __________ समय: आगच्छति तदा तयो: स्वरै: ज्ञायते यत् क: काक: अस्ति कश्च पिको वर्तते।

**मञ्जूषा**

| |
|---|
| वसन्तस्य, पिकस्य, पिककाकयो:, कृष्ण:। |

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत – $8\times\frac{1}{2}=4$

(i) एक: सिंह: विश्राम्यते स्म।

(ii) तत: प्रकृतिमाता प्रविशति।

(iii) वानरा: तं तुदन्ति स्म।

(iv) अधुना पशु: राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम्।

(v) सर्वे प्राणिन: सिंहस्य दशां दृष्ट्वा हसन्ति।

(vi) सर्वेषां प्राणिनामेव यथासमयं महत्त्वं विद्यते।

(vii) सर्वे प्राणिन: परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत् –

(viii) मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नत्रयम्) $3\times1=3$

(i) अश्वश्चेद् धावने वीर: भारस्य वहने खर:।

(A) गज: (B) सिंह:

(C) गर्दभ: (D) व्याघ्र:

(ii) सर्वेषु अपत्येषु जननी तुल्यवत्सला।

(A) सन्ततिषु (B) पुत्रीषु

(C) शिष्येषु (D) जनेषु

(iii) वायस: वसन्तस्य गुणं न जानाति।

(A) पिक: (B) काक:

(C) मयूर: (D) शुक:

(iv) अनृतं वदसि चेत् काक: दशेत्।

(A) उच्चै: (B) शनै:

(C) सत्यम् (D) असत्यम्

Marking Scheme
Strictly Confidential (For Internal and Restricted use only)
Secondary School Examination, 2025
SUBJECT NAME SANSKRIT (Q.P CODE 52)

General Instructions: -

| | |
|---|---|
| 1 | You are aware that evaluation is the most important process in the actual and correct assessment of the candidates. A small mistake in evaluation may lead to serious problems which may affect the future of the candidates, education system and teaching profession. To avoid mistakes, it is requested that before starting evaluation, you must read and understand the spot evaluation guidelines carefully. |
| 2 | “Evaluation policy is a confidential policy as it is related to the confidentiality of the examinations conducted, Evaluation done and several other aspects. Its leakage to public in any manner could lead to derailment of the examination system and affect the life and future of millions of candidates. Sharing this policy/document to anyone, publishing in any magazine and printing in News Paper/Website etc. may invite action under various rules of the Board and IPC.” |
| 3 | Evaluation is to be done as per instructions provided in the Marking Scheme. It should not be done according to one’s own interpretation or any other consideration. Marking Scheme should be strictly adhered to and religiously followed. However, while evaluating, answers which are based on latest information or knowledge and/or are innovative, they may be assessed for their correctness otherwise and due marks be awarded to them. In class-X, while evaluating two competency-based questions, please try to understand given answer and even if reply is not from marking scheme but correct competency is enumerated by the candidate, due marks should be awarded. |
| 4 | The Marking scheme carries only suggested value points for the answers.<br>These are in the nature of Guidelines only and do not constitute the complete answer. The students can have their own expression and if the expression is correct, the due marks should be awarded accordingly. |
| 5 | The Head-Examiner must go through the first five answer books evaluated by each evaluator on the first day, to ensure that evaluation has been carried out as per the instructions given in the Marking Scheme. If there is any variation, the same should be zero after deliberation and discussion. The remaining answer books meant for evaluation shall be given only after ensuring that there is no significant variation in the marking of individual evaluators. |
| 6 | Evaluators will mark( √ ) wherever answer is correct. For wrong answer CROSS ‘X’ be marked. Evaluators will not put right (✓) while evaluating which gives an impression that answer is correct and no marks are awarded. This is most common mistake which evaluators are committing. |
| 7 | If a question has parts, please award marks on the right-hand side for each part. Marks awarded for different parts of the question should then be totaled up and written in the left-hand margin and encircled. This may be followed strictly. |
| 8 | If a question does not have any parts, marks must be awarded in the left-hand margin and encircled. This may also be followed strictly. |
| 9 | If a student has attempted an extra question, answer of the question deserving more marks should be retained and the other answer scored out with a note “Extra Question”. |
| 10 | No marks to be deducted for the cumulative effect of an error. It should be penalized only once. |
| 11 | A full scale of marks ___________(example 0 to 80/70/60/50/40/30 marks as given in Question Paper) has to be used. Please do not hesitate to award full marks if the answer deserves it. |
| 12 | Every examiner has to necessarily do evaluation work for full working hours i.e., 8 hours every day and evaluate 20 answer books per day in main subjects and 25 answer books per day in other subjects (Details are given in Spot Guidelines).This is in view of the reduced syllabus and number of questions in question paper. |

| | |
|---|---|
| 13 | Ensure that you do not make the following common types of errors committed by the Examiner in the past:-<br>● Leaving answer or part thereof unassessed in an answer book.<br>● Giving more marks for an answer than assigned to it.<br>● Wrong totaling of marks awarded on an answer.<br>● Wrong transfer of marks from the inside pages of the answer book to the title page.<br>● Wrong question wise totaling on the title page.<br>● Wrong totaling of marks of the two columns on the title page.<br>● Wrong grand total.<br>● Marks in words and figures not tallying/not same.<br>● Wrong transfer of marks from the answer book to online award list.<br>● Answers marked as correct, but marks not awarded. (Ensure that the right tick mark is correctly and clearly indicated. It should merely be a line. Same is with the X for incorrect answer.)<br>● Half or a part of answer marked correct and the rest as wrong, but no marks awarded. |
| 14 | While evaluating the answer books if the answer is found to be totally incorrect, it should be marked as cross (X) and awarded zero (0)Marks. |
| 15 | Any unassessed portion, non-carrying over of marks to the title page, or totaling error detected by the candidate shall damage the prestige of all the personnel engaged in the evaluation work as also of the Board. Hence, in order to uphold the prestige of all concerned, it is again reiterated that the instructions be followed meticulously and judiciously. |
| 16 | The Examiners should acquaint themselves with the guidelines given in the "Guidelines for Spot Evaluation" before starting the actual evaluation. |
| 17 | Every Examiner shall also ensure that all the answers are evaluated, marks carried over to the title page, correctly totaled and written in figures and words. |
| 18 | The candidates are entitled to obtain photocopy of the Answer Book on request on payment of the prescribed processing fee. All Examiners/Additional Head Examiners/Head Examiners are once again reminded that they must ensure that evaluation is carried out strictly as per value points for each answer as given in the Marking Scheme. |

**सामान्य निर्देश :**

अ) अंक योजना में उत्तरों के लिए केवल सुझाए गए मान बिंदु होते हैं।

ब) ये केवल दिशानिर्देश हैं और पूर्ण उत्तर का गठन नहीं करते हैं।

स) छात्रों की अपनी अभिव्यक्ति हो सकती है और यदि अभिव्यक्ति सही है, तो उसी के अनुसार अंक दिए जाएंगे।

द) छात्रों को निर्धारित प्रक्रिया शुल्क के भुगतान एवं अनुरोध पर उत्तर पुस्तिका की फोटोकॉपी प्राप्त करने की अनुमति दी जाएगी।
सभी मूल्यांकनकर्ताओं/ अतिरिक्त मुख्य परीक्षकों/प्रधान परीक्षकों को एक बार फिर याद दिलाया जाता है कि वे यह सुनिश्चित करें कि अंक योजना में दिए गए प्रत्येक उत्तर के लिए मूल्य बिंदुओं के अनुसार मूल्यांकन किया जाता है।

इ) समस्त प्रधान परीक्षकों/अतिरिक्त प्रधान परीक्षकों/मूल्यांकनकर्ताओं को निर्देशित किया जाता है कि उत्तरपुस्तिकाओं का मूल्यांकन करते समय यदि उत्तर पूर्णतया गलत पाया जाता है तो गलत उत्तर पर (X) अंकित कर '0' अंक प्रदान किया जाए।

**खण्ड: 'क' (अपठितावबोधनम्)** **10 अङ्का:**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *2x1=2*

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)

(i) नद्य: (ii) आहारादिप्रवृत्तिषु (iii) ऋषि:/ दधीचि:

(आ) पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्) *2x2=4*

(i) परोपकारस्य प्रवृत्त्या एव मनुष्य: पशुभ्य: पृथक् भवति।

(ii) राजा शिवि: शरणागतस्य कपोतस्य रक्षायै स्वशरीरस्य मांसं कर्तयित्वा श्येनाय दत्तवान्।

(iii) मानव: स्वविवेकेन / ज्ञानेन च आत्मन: उन्नतिं करोति।

(इ) **परोपकार:/परेषाम् उपकार**: अथवा अन्यत् किमपि उपयुक्तं शीर्षकम्। *1*

(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) *3x1=3*

(i)(A) गाव: (ii)(A) ऋषि: (iii)(B) वृक्षा: (iv)(D) वृक्षेभ्य:

**खण्ड: 'ख' (रचनात्मकं-कार्यम्)** **15 अङ्का:**

2. **पत्रम्** (i)चिरंजीव (ii)कुशलम् (iii)अहम् (iv)महती (v)अनुशासनम् *10x½=5*

(vi)विद्यालयस्य (vii)तिरस्कुर्वन्ति (viii) साफल्यम् (ix)सावधान: (x)अरुणा

3. छात्रा: मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि लेखिष्यन्ति। *5x1=5*

बच्चों से सरल, संक्षिप्त वाक्यपूर्ति अपेक्षित है। इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है अत: केवल वाक्य की शुद्धता देखी जाए। वाक्य लघु हो अथवा दीर्घ हो- यह महत्त्वपूर्ण नहीं, व्याकरणिक दृष्टि से शुद्ध होने पर अंक दिए जाएँ। मञ्जूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे इन शब्दों का प्रयोग करें या नहीं- आवश्यक नहीं। वे अपने शब्दों का प्रयोग कर सकते हैं और शब्दों की विभक्ति आदि भी बदल सकते हैं। त्रुटियों के अंक अंशत: काटे जाएँ।

**अथवा ( अनुच्छेद लेखन)**

यह विकल्प सबके लिए है। मञ्जूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे इन शब्दों का प्रयोग करें या नहीं- आवश्यक नहीं। बच्चे अपने शब्दों का प्रयोग कर सकते हैं और शब्दों की विभक्ति आदि भी बदल सकते हैं। त्रुटियों के अंक अंशत: काटे जाएँ।

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं वाक्यपञ्चकम्) *5x1=5*

(i) वयं/वयं सर्वे संस्कृतं पठाम:।

(ii) वयं स्वस्वास्थ्यं रक्षेम/वयं स्वस्वास्थ्यस्य रक्षां कुर्याम/अस्माभि: स्वस्वास्थ्यस्य रक्षा/स्वास्थ्यरक्षा करणीया/कर्तव्या।

(iii) सैनिका: देशरक्षायै युद्धम् अकुर्वन् /अयुध्यन्/कृतवन्त:। अथवा सैनिकै: देशरक्षायै युद्धम् कृतम्।

(iv) ते क्षेत्रे / क्रीडाक्षेत्रे खेलितुम् / क्रीडितुम् / क्रीडनाय / खेलनाय गमिष्यन्ति /यास्यन्ति।

(v) चत्वार: वेदा: ईश्वरस्य वाणी सन्ति /अस्ति।

(vi) बालका: ! यूयं तत्र गच्छत। अथवा भवन्त: तत्र गच्छन्तु।

(vii) सर्वे सर्वदा/सदा प्रसन्ना: स्यु:/ भवेयु:। अथवा सर्वै: सर्वदा/सदा प्रसन्न: भवितव्य:/ प्रसन्ना: भवितव्या:।

**खण्ड: 'ग' (अनुप्रयुक्त-व्याकरणम्)** **25 अङ्का:**

5. सन्धिं सन्धिच्छेदं वा कुरुत-आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। (केवलं प्रश्नचतुष्टयम्) *4x1=4*

(i) योजकस्तत्र (ii) कृतान्त: + न (iii) सम्यग्युक्तम् (iv) कुर्वन् + आसीत् (v) एतयो: + जननी

6. रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत (केवलं प्रश्नचतुष्टयम्) *4x1=4*

(i)(D)अर्थस्य अभाव: (ii)(C)जनानां ग्रसनम्(iii)(A) तुल्यं वत्सलं यस्या: सा (iv)(B)शरीरदुर्बल:(v)(B)सूर्यचन्द्रयो:

7. प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) *4x1=4*

(i)(C) वरणीय+ टाप् (ii)(C) मासिकीम् (iii)(A) लघुत्वम् (iv)(B) शुद्ध+तल् (v)(A) गुण+ मतुप्

8. वाच्यानुसारं उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत - (केवलं प्रश्नत्रयम्) *3x1=3*

(i)(A) दृश्यन्ते (ii)(D) अहम् (iii)(B) पूजा (iv)(D) गम्यते

9. कालबोधकशब्दै: दिनचर्यां पूरयत-आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। (केवलं प्रश्नचतुष्टयम्) *4x1=4*

(i) पादोन-सप्तवादने (ii)अष्टवादने (iii)सार्ध-एकवादने/सार्धैक (iv)सपाद-चतुर्वादने (v)सप्तवादने

10. मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) *3x1=3*

(i) कदा (ii) ह्य: (iii) तर्हि (iv) शनै:

11. अधोलिखितवाक्येषु रेखाङ्कित–अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुन: लिखत-(केवलं प्रश्नत्रयम्) *3x1=3*

(i)(D) अस्ति (ii)(B) नीलम् (iii)(A) शाखायाम् (iv)(C) पुत्रे

**खण्ड: 'घ' पठितावबोधनम् 30 अङ्का:**

इस खण्ड का मूल उद्देश्यपठित अवबोधन अवबोधन परीक्षण है।आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ।

12. गद्यांश:- बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। *5*

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) *2x½=1*

(क) ग्रामे/ देउलाख्ये/ देउलाख्ये ग्रामे (ख) पितुर्गृहम्/ पितुर्गृहे/ पितुर्गृहं प्रति (ग) गहनकानने / मार्गे

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) *2x1=2*

(क) सा पुत्रौ चपेटया प्रहृत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ:? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते।"

(ख) एकदा राजसिंहस्य भार्या/बुद्धिमती पितु: गृहं प्रति चलिता।

(ग) बुद्धिमती केनापि आवश्यककार्येण पितुर्गृहं प्रति चलिता।

(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्) *2x1=2*

(क) सा/ बुद्धिमती (ख) एकम्/ आगच्छन्तम् (ग) ददर्श

13. पद्यांश: - बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। *5*

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) *2x½=1*

(क) चातकम् (ख) दीनम् (ग) गगने

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) *2x1=2*

(क) बहव: अम्भोदा: सन्ति।

(ख) सर्वस्य पुरत: दीनं वच: न वक्तव्यम्।

(ग) अम्भोदा: वृष्टिभि: वसुधाम् आर्द्रयन्ति।

(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्) *2x1=2*

(क) अम्भोदेभ्य: (ख) बहव: (ग) पुरत:

14. नाट्यांश:- बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। *5*

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) *2x½=1*

(क) पुत्रस्य (ख) जननी (ग) कृच्छ्रेण

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) *2x1=2*

(क) दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव।

(ख) सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

(ग) आखण्डल: इदं कथयित्वा सुरभिम् असान्त्वयत्-"गच्छ वत्से ! सर्वं भद्रं जायेत।"

(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्) *2x1=2*

(क) दुर्बले (ख) कृषक: (ग) श्रुत्वा

15. प्रश्ननिर्माणं कुरुत : इस प्रश्न में बच्चे केवल प्रश्नवाचक शब्द लिख सकते हैं। वर्तनी की अशुद्धता के लिए अनुपातत: अंक काटे जाएँ।(केवलं प्रश्नचतुष्टयम्) *4x1=4*

(i) कस्मै/ कस्य कृते (ii) कस्या: (iii) कौ (iv) काभ्याम् (v) क:

16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत - *4x1=4*

**अन्वय:**(i) नीतिम् (ii) समालम्ब्य (iii) अपि (iv) लीलया

**अथवा**

**भावार्थ:**(i) कृष्ण: (ii) पिकस्य (iii) पिककाकयो: (iv) वसन्तस्य

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत- *8x½=4*

(i) एक: सिंह: विश्राम्यते स्म।

(ii) वानरा: तं तुदन्ति स्म।

(iii) सर्वे प्राणिन: सिंहस्य दशां दृष्ट्वा हसन्ति।

(iv) सर्वे प्राणिन: परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत् -

(v) अधुना पशु: राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम्।

(vi) तत: प्रकृतिमाता प्रविशति।

(vii) सर्वेषां प्राणिनामेव यथासमयं महत्त्वं विद्यते।

(viii) मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नत्रयम्) *3x1=3*

(i)(C) गर्दभ: (ii)(A) सन्ततिषु (iii)(B) काक: (iv)(D) असत्यम्

*********